# Atmavireshvara Stotram

# आत्मावीरेश्वरस्तोत्रम्

## Document Information

Text title : Atmavireshvara Stotram

File name : AtmAvIreshvarastotram.itx

Category : shiva

Location : doc_shiva

Proofread by : Rajesh Thyagarajan

Description/comments : shrIskandapurANe kAshIkhaNDe

Latest update : December 4, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 4, 2022

*sanskritdocuments.org*

# आत्मावीरेश्वरस्तोत्रम्

ध्यानम् -
विभूति-भूषितं बालमष्टवर्षाकृतिं शिशुम् ।
आकर्णपूर्णनेत्रं च सुरक्तदशनच्छदम् ॥ १॥

चारु-पिङ्गजटा-मौलिं नग्नं प्रहसिताननम् ।
शैशवोचित-नेपथ्य-धारिणं चित्रहारिणम् ॥ २॥

पठन्तं श्रुतिसूक्तानि हसन्तं च स्वलीलया ।
एवं वीरेश्वरं ध्यात्वा स्तोत्रमेतज्जपेन्नरः ॥ ३॥

एकं ब्रह्मैवाऽद्वितीयं समस्तं सत्यं सत्यं नेह नानाऽस्ति किञ्चित् ।
एको रुद्रो न द्वितीयोऽवतस्थे तस्मादेकं त्वां प्रपद्ये महेशम् ॥ १॥

एकः कर्त्ता त्वं हि सर्वस्य शम्भो नानारूपेष्वेकरूपोऽप्यरूपः ।
यद्वत् प्रत्यम्ब्वर्क एकोऽप्यनेकस्तस्मान्नाऽयं त्वां विनेशं प्रपद्ये ॥ २॥

रज्जौ सर्पः शुक्तिकायां च रौप्यं नैरः पूरस्तन्मृगाख्ये मरीचौ ।
यद्वत् तद्वद् विष्वगेष प्रपञ्चो यस्मिन्ज्ञाते तं प्रपद्ये महेशम् ॥ ३॥

तोये शैत्यं दाहकत्वं च वह्नौ तापो भानौ शीतभानौ प्रसादः ।
पुष्पे गन्धो दुग्धमध्ये च सर्पिर्यत्तच्छम्भो त्वं ततस्त्वां प्रपद्ये ॥ ४॥

शब्दङ्गृह्णास्यश्रवास्त्वं हि जिघ्रे घ्राणस्त्वं व्यङ्घ्रिरायासि दूरात् ।
व्यक्षः पश्येस्त्वंरसज्ञोऽप्यजिह्वः कस्त्वांसम्यकुवेत्त्यतस्त्वां प्रपद्ये ॥ ५॥

नो वेदस्त्वामीश साक्षाधिवेद नोवाविष्णुर्नो विधाताऽखिलस्य ।
नो योगीन्द्रा नेन्द्रमुख्याश्च देवा भक्तो वेद त्वामतस्त्वां प्रपद्ये ॥ ६॥

नो ते गोत्रं नाऽपि जन्माऽपि नाख्यानो वा रूपं नैव शीलं न देशः ।
इत्थम्भूतोऽपीश्वरस्त्वं त्रिलोक्याः सर्वान् कामान् पूरयेस्तद्भजे त्वाम् ॥ ७॥

त्वत्तः सर्वत्वं हिसर्वस्मरारेत्वङ्गौरीशस्त्वं चनग्नोऽतिशान्तः ।

त्वं वै वृद्धस्त्वं युवात्वञ्चबालस्तत्किंयत्त्वम्भास्यतस्त्वां नतोऽस्मि ॥ ८॥

स्तुत्वेति विप्रो निपपात भूमौ स दण्डवद्यावदतीव हृष्टः ।
तावत्सबालोऽखिलवृद्धवृद्धः प्रोवाच भूदेव वरं वृणीहि ॥ ९॥

तत उत्थाय हृष्टात्मा मुनिर्वैश्वानरः कृती ।
प्रत्यब्रवीत् किमज्ञातं सर्वज्ञस्य तव प्रभो ॥ १०॥

सर्वान्तरात्मा भगवान् सर्वः सर्वगतो भवान् ।
याञ्चां प्रतिनियुङ्क्ते मां किमीशो दैन्यकारिणीम् ॥ ११॥

इति श्रुत्वा वचस्तस्य देवो वैश्वानरस्य ह ।
शुचेः शुचिव्रतस्याथ शुचि स्मित्वाऽब्रवीच्छिशुः ॥ १२॥

बाल उवाच -
त्वया शुचे शुचिष्मत्यां योऽभिलाषः कृतो हृदि ।
अचिरेणैव कालेन स भविष्यत्यसंशयः ॥ १३॥

तव पुत्रत्वमेष्यामि शुचिष्मत्यां महामते ।
ख्यातो गृहपतिर्नाम्ना शुचिः सर्वामरप्रियः ॥ १४॥

अभिलाषाष्टकं पुण्यं स्तोत्रमेतत्त्वयेरितम् ।
अब्दं त्रिकालपठनात् कामदं शिवसन्निधौ ॥ १५॥

एतत् स्तोत्रस्य पठनं पुत्र-पौत्र-धनप्रदम् ।
सर्वशान्तिकरं चाऽपि सर्वापत्त्यरिनाशनम् ॥ १६॥

स्वर्गा-ऽपवर्ग-सम्पत्तिकारकं नाऽत्र संशयः ॥

प्रातरुत्थाय सुस्नातो लिङ्गमभ्यर्च्य शाम्भवम् ॥ १७॥

वर्षं जपन्निदं स्तोत्रमपुत्रः पुत्रवान् भवेत् ।
वैशाखे कार्तिक माघे विशेषनियमैर्युतः ॥ १८॥

यः पठेत् स्नानसमये लभते सकलं फलम् ।
कार्तिकस्य तु मासस्य प्रसादादहमव्ययः ॥ १९॥

तव पुत्रत्वमेष्यामि यस्त्वन्यस्तत् पठिष्यति ।
अभिलाषाष्टकमिदं न देयं यस्य कस्यचित् ॥ २०॥

गोपनीयं प्रयत्नेन महाबन्ध्याप्रसूतिकृत् ।

स्त्रिया वा पुरुषेणाऽपि नियमाल्लिङ्गसन्निधौ ॥ २१॥

अब्दं जप्तमिदं स्तोत्रं पुत्रदं नात्र संशयः ।
इत्युक्त्वाऽन्तर्दधे बालः सोऽपि विप्रो गृहं गतः ॥ २२॥

इति श्रीस्कन्दपुराणे काशीखण्डे आत्मावीरेश्वरस्तोत्रं सम्पूर्णम् ।

Proofread by Rajesh Thyagarajan

*Atmavireshvara Stotram*

pdf was typeset on December 4, 2022

Please send corrections to *sanskrit@cheerful.com*